# Lomashaproktam Shri Svami Kavacham

# લોમશપ્રોક્તં શ્રીસ્વામિકવચમ્

## Document Information

Text title : Lomashaproktam Shri Svami Kavacham

File name : lomashaproktaMshrIsvAmikavacham.itx

Category : deities_misc, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 13/46-70||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# લોમશપ્રોક્તં શ્રીસ્વામિકવચમ્

સ્ત્રીભિઃ સાકં સુયોદ્ધવ્યં સ્ત્રીભિરેવ હિ ધર્મતઃ ।
ભવત્યઃ કન્યકાઃ સર્વા ધારયન્તુ હિ વર્મ ચ ॥ ૪૬॥

શસ્ત્રાણીમાનિ સર્વાણિ ધારયન્તુ યથાયથમ્ ।
મન્ત્રાન્ દિવ્યાન્ ધારયન્તુ નાશયન્તુ ચ તા દ્રુતમ્ ॥ ૪૭॥

ઇત્યુક્ત્વા લોમશઃ શીઘ્રં પત્યર્થપ્રાણરક્ષિકાઃ ।
કન્યકાઃ શ્રાવયામાસ શ્રીસ્વામિકવચં તદા ॥ ૪૮॥

ત્રિરાચમ્ય હરિં ધ્યાત્વા પ્રાણાનાયમ્ય ત્રિસ્તથા ।
મસ્તકે મે હરેરસ્તુ મસ્તકં ચ મુખે મુખમ્ ॥ ૪૯॥

નેત્રયોર્મેઽસ્ય નેત્રે સ્તાં શ્રવસોર્મેઽસ્ય વૈ શ્રવૌ ।
મમ કણ્ઠે હરેઃ કણ્ઠો હસ્તયોર્મે હરેઃ કરૌ ॥ ૫૦॥

વક્ષસિ સ્તનયોર્મે ચ હરેર્વક્ષઃસ્તનૌ તથા ।
ઉદરે મે હરેરસ્તૂદરં કટ્યાં હરેઃ કટિઃ ॥ ૫૧॥

પૃષ્ઠે પૃષ્ઠં નિતમ્બયોર્મે નિતમ્બૌ હરેસ્તથા ।
ગુહ્મે ગુહ્મં તથા સક્થ્નોઃ સક્થિની પાદયોઃ પદે ॥ ૫૨॥

સર્વા મૂર્તિર્હરેરસ્તુ મયિ સર્વાઙ્ગમૂર્તિકે ।
ઇતિ ન્યાસાન્ વિધાયૈવ સ્વામિકવચમુચ્ચરેત્ ॥ ૫૩॥

ૐ અનાદિશ્રીકૃષ્ણનારાયણઃ સર્વપ્રહેતિમાન્ ।
દિવ્યવિમાનમારૂઢઃ સર્વરક્ષાં કરોતુ નઃ ॥ ૫૪॥

શઙ્ખચક્રગદાપદ્મચર્માસિચાપપાશવાન્ ।
ધનુસ્ત્રિશૂલશરવાન્ શસ્ત્રેભ્યોઽવતુ નો હરિઃ ॥ ૫૫॥

વ્યોમ્નિ દિવ્યક્રમોઽવ્યાન્નોઽનલે કૃષ્ણનરાયણઃ ।
વાયૌ પ્રાણપતિઃ પાયાજ્જલે સ્વામી પરાત્પરઃ ॥ ૫૬॥

પૃથ્વ્યામવ્યાદ્બાલકૃષ્ણો યુદ્ધેઽવ્યાત્પુરુષોત્તમઃ ।
શસ્ત્રાસ્ત્રમન્ત્રપાતેભ્યોઽવ્યાન્નઃ પતિઃ ફલસ્થિતઃ ॥ ૫૭॥

ઇન્દ્રજાલાદિમાયાભ્યોઽન્તરાત્માઽવ્યાત્ શ્રિયઃ પતિઃ ।
પ્રિયસ્વામી કૃષ્ણનારાયણોઽવ્યાત્કાલવેગતઃ ॥ ૫૮॥

રાક્ષસીભ્યઃ કૃષ્ણકાન્તશ્ચાવ્યાદનવધાનતઃ ।
મૃત્યુરોગાઽચિન્ત્યભીભ્યઃ પાતુ ન કૃષ્ણવલ્લભઃ ॥ ૫૯॥

ભૌતિકેભ્યો વિકારેભ્યઃ પાતુ નોઽક્ષરધામપઃ ।
સર્વાવસ્થાસુ સર્વેભ્યઃ પાતુ ત્વન્તરગઃ પ્રભુઃ ॥ ૬૦॥

સંહર રાક્ષસીસૈન્યં રક્ષય કન્યકાકુલમ્ ।
આનન્દય તતો નશ્ચ જયં દેહિ પરેશ્વર ॥ ૬૧॥

ઓમનાદિકૃષ્ણનારાયણોઽસ્ય દેવતાઽવતુ ।
લોમશાય નમઃ સ્વામિકવચસ્યર્ષયે સદા ॥ ૬૨॥

કમ્ભરાશ્રીમહાલક્ષ્મ્યૈ રક્ષાકર્ત્ર્યૈ નમોઽવતુ ।
નારાયણાય ગોપાલકૃષ્ણાય ચ નમોઽવતુ ॥ ૬૩॥

ઇત્યુચ્ચાવિતમેવૈતત્કવચં કોટિરૂપધૃક ।
ક્ષણાદજાયત કોટિસૂર્યવર્તુલમુજ્જ્વલમ્ ॥ ૬૪॥

કન્યાસ્તા ધારયામાસૂ રાધિકે ચ ત્વયા સહ ।
મઞ્જુલા પાર્વતી લક્ષ્મીઃ પ્રભા હંસા ચ માણિકી ॥ ૬૫॥

કોટિકોટ્યઃ સ્વર્ણવર્ણં દધ્યુસ્તચ્છેદવર્જિતમ્ ।
અવૃણં ચાઽવિયુક્તં ચ વર્મ વર્ષ્મસુ પૂરિતમ્ ॥ ૬૬॥

કોમલં નિષ્ઠુરં ચાપિ સુખસ્પર્શં ચ રક્ષકમ્ ।
ધૃત્વા જલેન સાકં ચ શસ્ત્રાસ્ત્રમન્ત્રકાન્ પપુઃ ॥ ૬૭॥

કન્યકાવર્મમન્ત્રાઢ્યા યુગપત્ કૃપયાઽભવન્ ।
“ગ્રસત્વેતત્ કૃષ્ણકાન્તઃ કાન્તાર્થમોં ક્ષઃ ફટ્ સ્વાહા” ॥ ૬૮॥

જજપુસ્તા મન્ત્રમેવં ચાષ્ટોત્તરશતં તદા ।
યુદ્ધે સર્વત્ર ચાન્યત્ર યઃ સ્મૃતો રક્ષકોઽસ્તિ વૈ ॥ ૬૯॥

મન્ત્રશ્ચાયં ધૃતસ્તાભિર્જપ્તશ્ચાપિ તતઃ પરમ્ ।
લોમશઃ પ્રદદૌ તાભ્યોઽણિમાદ્યાઃ સિદ્ધયસ્તથા ॥ ૭૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ ત્રેતાયુગસન્તાનાત્મકસ્ય
દ્વિતીયખણ્ડે ૧૩-અધ્યાયાન્તર્ગતં લોમશપ્રોક્તં શ્રીસ્વામિકવચમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૧૩/૪૬-૭૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 13/46-70..

Proofread by PSA Easwaran

---

*Lomashaproktam Shri Svami Kavacham*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*